শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে অযোধ্যাকাণ্ডে

# ॥ একোননৱতিতমঃ সর্গঃ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

# ॥ একোননৱতিতমঃ সর্গঃ ॥

## গঙ্গামুত্তীর্য সেনাসহিতস্য ভরতস্য ভরদ্ৱাজাশ্রমে গমনম্

ৱ্যুষ্য রাত্রিং তু তত্রৈৱ গঙ্গাকূলে স রাঘৱঃ।
কাল্যমুত্থায শত্রুঘ্নমিদং ৱচনমব্রৱীৎ॥ **2.89.1** ॥

শত্রুঘ্নোত্তিষ্ঠ কিং শেষে নিষাদাধিপতিং গুহম্।
শীঘ্রমানয ভদ্রং তে তারযিষ্যতি ৱাহিনীম্॥ **2.89.2** ॥

জাগর্মি নাহং স্ৱপিমি তথৈৱার্যং ৱিচিন্তযন্।
ইত্যেৱমব্রৱীদ্ ভ্রাতা শত্রুঘ্নো ৱিপ্রচোদিতঃ॥ **2.89.3** ॥

ইতি সংৱদতোরেৱমন্যোন্যং নরসিংহযোঃ।
আগম্য প্রাঞ্জলিঃ কালে গুহো ৱচনমব্রৱীৎ॥ **2.89.4** ॥

কচ্চিৎ সুখং নদীতীরেঽৱাৎসীঃ কাকুৎস্থ শর্ৱরীম্।
কচ্চিচ্চ সহসৈন্যস্য তৱ নিত্যমনামযম্॥ **2.89.5** ॥

গুহস্য তৎ তু ৱচনং শ্রুৎৱা স্নেহাদুদীরিতম্।
রামস্যানুৱশো ৱাক্যং ভরতোঽপীদমব্রৱীৎ॥ **2.89.6** ॥

সুখা নঃ শর্ৱরী ধীমন্ পূজিতাশ্চাপি তে ৱযম্।
গঙ্গাং তু নৌভির্বহ্ৱীভির্দাশাঃ সন্তারযন্তু নঃ॥ **2.89.7** ॥

ততো গুহঃ সন্ত্বরিতঃ শ্রুৎৱা ভরতশাসনম্।
প্রতিপ্রৱিশ্য নগরং তং জ্ঞাতিজনমব্রৱীৎ॥ **2.89.8** ॥

উত্তিষ্ঠত প্রবুধ্যধ্ৱং ভদ্রমস্তু হি ৱঃ সদা।
নাৱঃ সমুপকর্ষধ্ৱং তারযিষ্যামি ৱাহিনীম্॥ **2.89.9** ॥

তে তথোক্তাঃ সমুত্থায ৎৱরিতা রাজশাসনাৎ।
পঞ্চ নাৱাং শতান্যেৱ সমানিন্যুঃ সমন্ততঃ॥ **2.89.10** ॥

অন্যাঃ স্ৱস্তিকৱিজ্ঞেযা মহাঘণ্টাধরাৱরাঃ।
শোভমানাঃ পতাকিন্যো যুক্তৱাহাঃ সুসংহতাঃ॥ **2.89.11** ॥

ততঃ স্ৱস্তিকৱিজ্ঞেযাং পাণ্ডুকম্বলসংৱৃতাম্।
সনন্দিঘোষাং কল্যাণীং গুহো নাৱমুপাহরৎ॥ **2.89.12** ॥

তামারুরোহ ভরতঃ শত্রুঘ্নশ্চ মহাবলঃ।
কৌসল্যা চ সুমিত্রা চ যাশ্চান্যা রাজযোষিতঃ॥ **2.89.13** ॥

পুরোহিতশ্চ তৎ পূর্ৱং গুরৱো ব্রাহ্মণাশ্চ যে।
অনন্তরং রাজদারাস্তথৈৱ শকটাপণাঃ॥ **2.89.14** ॥

আৱাসমাদীপযতাং তীর্থং চাপ্যৱগাহতাম্।
ভাণ্ডানি চাদদানানাং ঘোষস্তু দিৱমস্পৃশৎ॥ **2.89.15** ॥

পতাকিন্যস্তু তা নাৱঃ স্ৱযং দাশৈরধিষ্ঠিতাঃ।
ৱহন্ত্যো জনমারূঢং তদা সম্পেতুরাশুগাঃ॥ **2.89.16** ॥

নারীণামভিপূর্ণাস্তু কাশ্চিৎ কাশ্চিৎ তু ৱাজিনাম্।
কাশ্চিৎ তত্র ৱহন্তি স্ম যানযুগ্যং মহাধনম্॥ **2.89.17** ॥

তাস্তু গৎৱা পরং তীরমৱরোপ্য চ তং জনম্।
নিৱৃত্তা কাণ্ডচিত্রাণি ক্রিযন্তে দাশবন্ধুভিঃ॥ **2.89.18** ॥

সৱৈজযন্তাস্তু গজা গজারোহৈঃ প্রচোদিতাঃ।
তরন্তঃ স্ম প্রকাশন্তে সপক্ষা ইৱ পর্ৱতাঃ॥ **2.89.19**॥

নাৱশ্চারুরুহস্ত্ৱন্যে প্লৱৈস্তেরুস্তথাপরে।
অন্যে কুম্ভঘটৈস্তেরুরন্যে তেরুশ্চ বাহুভিঃ॥ **2.89.20**॥

সা পুণ্যা ধ্ৱজিনী গঙ্গাং দাশৈঃ সন্তারিতা স্ৱযম্।
মৈত্রে মুহূর্তে প্রযযৌ প্রযাগৱনমুত্তমম্॥ **2.89.21**॥

আশ্ৱাসযিৎৱা চ চমূং মহাত্মা
  নিৱেশযিৎৱা চ যথোপজোষম্।
দ্রষ্টুং ভরদ্ৱাজমৃষিপ্রৱর্য -
  মৃৎৱিক্সদস্যৈর্ভরতঃ প্রতস্থে॥ **2.89.22**॥

স ব্রাহ্মণস্যাশ্রমমভ্যুপেত্য
  মহাত্মনো দেৱপুরোহিতস্য।
দদর্শ রম্যোটজৱৃক্ষদেশং
  মহদ্ৱনং ৱিপ্রৱরস্য রম্যম্॥ **2.89.23**॥

॥ ইত্যার্ষে শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে
অযোধ্যাকাণ্ডে একোননৱতিতমঃ সর্গঃ॥